# Devaih Kritam 15 Vishnu Stotram

# देवैः कृतं १५ विष्णुस्तोत्रम्

## Document Information

Text title : Devaih Kritam 15 Vishnu Stotram

File name : devaiHkRRitaM15viShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | AraNyakaparva | adhyAya 100/18-24||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# देवैः कृतं १५ विष्णुस्तोत्रम्

ततो देवाः समेतास्ते तदोचुर्मधुसूदनम् ।
त्वं नः स्रष्टा च पाता च भर्ता च जगतः प्रभो ।
त्वया सृष्टमिदं सर्वं यच्चेङ्गं यच्च नेङ्गति ॥ १८॥

त्वया भूमिः पुरा नष्टा समुद्रात्पुष्करेक्षण ।
वाराहं रूपमास्थाय जगदर्थे समुद्धृता ॥ १९॥

आदिदैत्यो महावीर्यो हिरण्यकशिपुस्त्वया ।
नारसिंहं वपुः कृत्वा सूदितः पुरुषोत्तम ॥ २०॥

अवध्यः सर्वभूतानां बलिश्चापि महासुरः ।
वामनं वपुराश्रित्य त्रैलोक्याद्भ्रंशितस्त्वया ॥ २१॥

असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः ।
यज्ञक्षोभकरः क्रूरस्त्वयैव विनिपातितः ॥ २२॥

एवमादीनि कर्माणि येषां सङ्ख्या न विद्यते ।
अस्माकं भयभीतानां त्वं गतिर्मधुसूदन ॥ २३॥

तस्मात्त्वां देव देवेश लोकार्थं ज्ञापयामहे ।
रक्ष लोकांश्च देवांश्च शक्रं च महतो भयात् ॥ २४॥

इति महाभारते आरण्यकपर्वणि १०० अध्यायान्तर्गतं
देवैः कृतं विष्णुस्तोत्रं सम्पूर्णम् ।

महाभारत । आरण्यकपर्व । अध्याय १००/१८-२४॥

पद्मपुराण । सृष्टिखण्ड । अध्याय १९/११९-१२९॥

mahAbhArata . AraNyakaparva . adhyAya 100/18-24..

Also, padmapurANa . sRiShTikhaNDa . adhyAya 19/119-129..

Proofread by PSA Easwaran

*Devaih Kritam 15 Vishnu Stotram*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*